नित्यहोमविधिः

२२८ नं. २२४ नित्य होम विधि प. ३

ॐश्रीगणेशाय नमः ॐअथ नित्यहोमविधिः आचम्य प्राणायामत्रयंकृत्वा ॐमद्येत्यादि पंचसूनाजनितपापक्षयार्थं श्रीयज्ञेश्वर प्रीत्यर्थंच पंचमहायज्ञांगत्वेन नित्यहोम महं करिष्ये। ततोग्निं प्रज्वाल्य प्रणवेनाभ्युक्ष्य ॐजातवेदसे नमः इत्यग्निं गंधादिभिः संपूज्य ततः स्रुवेणाज्यमादाय ॐसूर्याय स्वाहा इदं सूर्याय स्वाहा ॐप्रजापतये स्वाहा इदं प्रजापतये स्वाहा ॐसोमाय वनस्पतये स्वाहा इदं सोमा ॐअग्निसोमा

हो १

भ्यांस्वाहा इदमग्निसोमाभ्यांस्वाहा इद ओंइंद्राग्निभ्यांस्वाहा
इदमिंद्राग्निभ्यांस्वाहा ५ ओंद्यावापृथिवीभ्यांस्वाहा इदं
द्यावापृथिवीभ्यांस्वाहा ६ ओंयन्वंतरयेस्वाहा ओंइदंयन्वं
तरयेस्वाहा ओंइन्द्रायस्वाहा इदमिन्द्रायस्वाहा ओंविश्वे
भ्योदेवेभ्यःस्वाहा इदं विश्वेभ्योदेवेभ्यःस्वाहा ९ ओंब्र
ह्मणेस्वाहा इदंब्रह्मणेस्वाहा ओंभूःस्वाहा इदंभूःस्वाहा
ओंभुवःस्वाहा इदंभुवःस्वाहा ओंस्वःस्वाहा॥१२ ओंभूर्भुवःस्वः
स्वाहा इदंभूर्भुवःस्वः ततोयथाशक्ति स्विष्टमंत्रहोमः

ॐब्रह्मणेस्वाहा इदंब्रह्मणेस्वाहा ॐप्रजापतयेस्वा
हा इदंप्रजापतयेस्वाहा ॐग्रहेभ्यःस्वाहा इदंग्रहे
भ्यःस्वाहा ॐकश्यपायस्वाहा इदंकश्यपायस्वाहा
ॐअनुमतयेस्वाहा इदमनुमतयेस्वाहा ॐअग्नये
स्विष्टकृतेस्वाहा इदमग्नये ८ ततःपूर्णाहुतिः अग्निं
पूजयित्वा स्रुवोपरि फलपुष्पाण्यादाय ॐसप्तते
अग्नेसमिधः सप्तजिह्वाः सप्तऋषयः सप्तधाम प्रि
याणि सप्तहोत्राः सप्तधात्वायजंति सप्तयोनीरा पृण

हो॰ स्वाहुतेनस्वाहा ततोग्निं प्रार्थयेत् स्रद्धा मेधां यशः
२ प्रज्ञां विद्यांवुद्धिं यशोबलं आयुष्यं तेज आरोग्यं
देहिमे हव्यवाहन १ इति नित्यहोमविधिः ॥

